Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका – ६७ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि पञ्चम्यां अनूराधाक्षत्रयुक्त गुरुवासरः ०६ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

या साधूंश्च खलान्करोति विदुषो मूर्खान् हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनिन्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ।।

## संस्कृते प्रीतिरस्तु

बहवो जनाः संस्कृतं जानन्तोऽपि तत्र प्रीतिं न रक्षन्ति । जीविकार्जनायै यः कोऽपि विषयोऽध्येतव्यः । अस्माभिः संस्कृतम् अधीतं बोधितं च । तत्र तस्य समाप्तिः । इदानीं किम् अस्माकं तेन ? इति ते वदन्ति । एतादृशैरस्माकं किमपि प्रयोजनं नास्ति । येषां संस्कृते प्रीतिरस्ति, ते संस्कृतज्ञाः अन्ये वा भवन्तु नामः, त एवास्माभिराश्रयणीयाः। संस्कृतज्ञा अपि संस्कृत प्रीतिरहिता वदन्ति 'एषापि एका भाषा, एषा न भवति चेत् किं नश्छिन्नम्? अन्यया कयापि भाषया व्यवहराम' इति । वयं तु संस्कृतभाषां प्राणेभ्योऽपि प्रियतरां मन्महे। सन्तु नामा सहस्राधिका अन्या भाषाः। ताः देवभाषासमाना न भवन्ति । वयमपि बह्वीः भाषा जानीमहे। किन्तु देवभाषया व्यवहरन्तो यत्सुखम् अनुभवामः, किन्तु कालिदासस्य वचस्सु यो मधुरिमा, या चार्थवत्ता, यत् कौमल्यं तदन्यत्र नास्ति। भगवद्गीता पठने य आन्दो भवति स किम् अनुवादपठने कृते जायेत? नैव नैव। सौन्दर्यलहरीपद्यानां पठने कृते मन्त्रपठनमपि सिध्यति। अनुवादे सा शक्तिर्नास्ति । अतो 'विद्वांसः' किमपि कथयन्तु। वयं संस्कृतम् आश्रयामः। एतदेव वयं निश्वसिमः। संस्कृतनिन्दकानां वचांसि अस्माकं प्रीतिं न न्यूनयन्ति । जयतु संस्कृतम् ।

## कावेरीनदीनिर्वहणामण्डलिरचना सद्यः नास्ति

नवदिल्ली-सर्वोच्चन्यायालये दीपक् मिश्रा उदय्ललित् न्यायाधीशयोः द्विसदस्यन्यायपीठस्य समक्षं कावेरी नदी जलविवादाभियोगस्य विचारणा पुनरपि समभवत्। कर्णाटक राज्यस्य प्रतिनिधिन्याय-वादी नारीमन् एव न्यायालये वादं कुर्वन् आदावेव न्यायाधीशौ कर्णाटकराज्यजलाशयेषु पर्याप्तं जलं नास्ति। अतः जलं प्रवाहयेदिति आदेशं पालयामः। गौरवं दास्याम इति। तदा तौ न्यायाधीशौ अधुना कियत् प्रमाणं जलं प्रवाहयितुं माध्यमिति नारीमन्नं पप्रच्छतुः। तदा सः प्रतिदिनं १५०० क्युसेक्स्प्रमाणं जलं प्रवाहयितुं साध्यमिति बभाण। तदा दौ न्यायाधीशौ अक्टोबर ७ दिनाङ्कतः १८दिनाङ्कं यावत् १२ दिवसान् यावत् प्रतिदिनं २००० क्युसेक्स् प्रमाणं जलं प्रवाहयितुं समादिदिशतुः। केन्द्रसर्वकारस्य विज्ञापनानुसारेण कावेरीनिर्वहण मण्डलिं रचयेत् इति कृतमादेशमपि तत्यजतुः। केन्द्रजलमण्डल्याः अध्यक्षस्य जि.एस्.झा नेतृत्वे कावेरीजलावेक्षणसमितिरेका राजनीया। कर्णाटक-तमिळुनाडु-केरळ-पुदुचेरिराज्यानां मुख्यकार्य-दर्शिनः मुख्याभियन्तारः समिति सदस्याः भवेयुः। समितेः जलतज्ज्ञाः तमिळुनाडु-कर्णाटक-राज्ययोः जलाशयान् गत्वा जलप्रमाणानि कियन्ति सन्ति। जलाशयेषु पर्याप्तं जलं नास्ति वा। वास्तविकस्थितयः काः इत्यादीन् प्रत्यक्षं गत्वा अवलोक्य सम्यक् सुदीर्घविवरणपत्रं अक्टोबर् १७दिनाङ्के सर्वोच्चन्यायालयाय समर्पणीयेयुः। न्यायालयः तद्विवरणानि सम्यक् परिशील्य ततः समुचितं आदेशं प्रदास्यतीति द्वि सदस्यपीठन्यायाधीशौ समादिश्य प्रकरणं पुरः स्थापयामासतुः। १८दिनाङ्के पुनः कावेरीजलप्रवण विवादाभियोगविचारणा भविष्यति ।

## भवननिपतनेन त्रयो मृताः

बेङ्गळूरु-निर्मीयमाणस्य भवनस्य निपतनेन त्रयो जना मृता बुधवासरे इति दारुणा वार्ता श्रूयते । अन्ये च केचनास्यां दुर्घटनायां व्रणिताः। मृतेष्वेको भवनरक्षक इति ज्ञायते । मृतानां सम्बन्धिभ्यः पञ्चलक्षरूप्य-काणां परिहारो दीयते इति सर्वकारीयाः वदन्ति । भूमिकाद्वयानिर्माणाय अनुमतिं प्राप्य पञ्च भूमिकाः निर्मिताः। अत एव दुर्घटना जाता । भवनस्य निर्माता अपराधीति तदुपरि न्यायालये व्यवहारः आरप्स्यते ।

## बालोऽजगरान्मुक्तः

बण्टवाळा-कर्णाटकराज्यस्य बण्ट वाळासमीपे अजगरेण गृहीतो वैशाखाख्यः बालको धैर्येण आत्मानं रक्षितवान् इति रोमाञ्च-कारिणी वार्ता श्रूयते । गते मङ्गळवारे एषा घटना अभवत्। वैशाखः बन्धूनां गृहात् स्वगृहम्। आगच्छति स्म । वृक्षस्योपरि स्थितः अजगरः सहसा तस्योपरि पतितः स्वदेहेन बालकम् आवृत्य पादं गिलितुम् आरभत । तदा धैर्यम् अवलम्ब्य बालकः हस्तेन शिलाखण्डं गृहीत्वा अजगारस्य अक्षिणी बलात् प्राहरत्। अजगरः बालकस्य हस्तम् अपि गिलितुं दृष्टं च प्रायतत । किन्तु बालकोऽभीतः शिलाखण्डेन अजगरस्य अक्षि प्राहरत्। व्रणितोऽजगरो बालकम् अमुञ्चत् । बालकस्य क्रन्दनं श्रुत्वा तत्रागताः बन्धवः तं चिकित्सालयम् अवयन्। अजगरस्य दंष्ट्राः बालकस्य देहे व्रणन् अकुर्वन्। किन्तु तस्य प्राणभयं नास्ति। वैद्याः व्रणविरोपणाय भेषजानि दत्तवन्तः। धैर्ये साहसे लक्ष्मीः इति वैशाखेन लोकाय नीतिः प्रदर्शिता ।

## गमनागमननीति नियमेषु परिष्काराः

लण्डन्-ब्रिटन्देशस्य गृहकार्यदर्शी श्रीमती आम्बर् रुड् मङ्गळवारे लण्डन्नगरस्य बर्मिंग्ह्याम्प्रदेशे प्रचलिते कन्सर्वेटिव्पक्षस्य वार्षिक समावेशे भाषमाणा ऐरोप्यसमुदाय-राष्ट्राणि विना इतरदेशवासिनां उद्योग विद्याभ्यासमार्गद्वारा देशान्तरागमन गमननीतिनियमान् कठिनरीत्या परिष्कर्तुं चिन्तनं कृतमित्यवोचत्। ब्रिटन्देशं देशान्तरेभ्यः आगच्छतां जनानां संख्या अधिका वर्तते। अतः देशान्तरेभ्यः आगच्छतः जनान् नियन्त्रयितुमपि समालोचनं कृतम्। ऐरोप्यसमुदायं परित्यज्य बहिरागनमेका कार्यसूची। उद्योग विद्याभ्यासार्थं इतरदेशेभ्यः समागच्छतां जनानां विषयेऽपि अस्मदीया दृष्टिः पतेदेव। विदेशीय वृत्तिपरकुशलजनान् उद्योगार्थं स्वीकरणात् प्रागेव उद्योगसंस्थाभिः क्रियमाणासु परीक्षासु क्लिष्टकर नियमानां परिष्काराः करिष्यन्ते । अतः नूतनदेशान्तरागतनीतिनियमान् परीक्षणात् प्रागेव विपरिणमयितव्या इति सा अवोचत् ।

अधुना कर्णाटकराज्य प्रशासकाः न्यायाङ्गनिन्दनभीतेः दूरं गताः। सर्वपक्षनेतारः अपि न्यायालयस्य आदेशं पालयितुमन्वमन्यन्त। कर्णाटकराज्यस्य मुख्यमन्त्री सिद्धरामय्यः विवादसन्दर्भेषु समस्याः दूरीकर्तुं साहाय्यं कृतवद्भ्यः प्रधानमन्त्रिणे नरेन्द्रमोदये भूतपूर्वप्रधानमन्त्रिणे हेच्.डि.देवेगौडाय विपक्षनेतृभ्यः स्वपक्षसचिवेभ्यः शासकेभ्यः मैसूरु-मण्ड्यप्रभृतिनगरेषु सहकारान् साहाय्यानि प्रदातृभ्यः नागरिकेभ्यः मङ्गळवारे कृतज्ञताः उवाच ।

## गन्धहुडि उत्सवः

मैसूरु-श्रीश्वेतवराहस्वामिनां देवालये १६तमदिनाङ्के वेदान्ताचार्याणां गन्धहुडि उत्सवः प्रचलिष्यति।

## सिङ्गपुर प्रधानी भारते

नवदिल्ली-सिङ्गपुरदेशस्य प्रधान-मन्त्री लीसीन् लूंग् भारतमागतः। सः भारतस्य प्रधानमन्त्रिणं नरेन्द्र मोदिनं तस्य कार्यालये संदृश्य तेन सह उभयदेशयोः स्नेहसौहार्दबल साहाय्यवर्धनाय चर्चितवान्। सर्वत्र विश्वे सीमाप्रदेशेषु उग्राततायिनः कुकृत्यानि कुर्वन्तः नागरिकान् मारयन्तः क्लेशान् जनयन्तस्सन्ति। तान् उग्रान् निगृह्य नाशयितुं सर्वदेशप्रशासकाः मुख्याः नेतारः प्रयत्नशीलाः भवेयुः। अतः सिंगपुरदेशप्रशासका अपि भारतदेशप्रशासकैः एकीभूय उग्राततायिनां दुष्कार्याणि नाशयेयुः। अन्तर्देशसीमाप्रदेशेषु भयोत्पादकान् दमयेयुः। नागरिक जनतारक्षणे उभयदेशयोः नेतारः परस्परं सहकारान् साहाय्यानि च दास्येयुरिति प्रधानमन्त्री श्री नरेन्द्र मोदी सिंगपुरप्रधानिनं विज्ञापयामस। उरिसेनाशिबिराणि उपरि पाकिस्तानस्य उग्राततायिनः कृतान्याक्रमणानि कुकृत्यानि च सिंगपुरप्रधानी लीसीन् लूंग् आक्रमेणेषु मृतानां कुटुम्बानां जनेभ्यः सिंगपुरसर्वकारेण सर्वविधसाहाय्यानि प्रदास्यामः इत्यवोचत् ।

## पलाण्डुमूल्यं न्यूनम्

हुब्बळ्ळी – पलाण्डुसमृद्धिर्वर्तते विपणौ। अनेन कारणेन पलाण्डु-मूल्यं भूमिं स्पृशति । एवं ग्राहकाः सन्तुष्टाः। किन्तु कृषीवलाः कष्टेवर्तन्ते। पलाण्डुरोहणाय यावद्धनं व्ययितं तावदपि न लभ्यते, कथं जीवितव्यम् इति कृषीवलाः पृच्छन्ति ।

## उग्राणां निष्कासन कार्याणि

नवदिल्ली-तालिबान् भयोत्पादकाः उग्राः आततायिनः आफ्घानिस्तान देशस्य उत्तरभागे स्थितं कुन्दुज्नगर मुपरि आक्रमणानि कुर्वन्तिः सन्ति। तान् तालिबान् भयोत्पादकान् उग्रान् तस्माद्देशात् बहिर्निष्कासयितुं आफ्घन्सेना योधाः क्रियाशीलास्सन्ति। मङ्गळवारे न्याटो सेनाबलयोधानां सहकारैः सोमवारस्य रात्रेः मङ्गवारस्य प्रातः कालं यावत् आफ्घान्सेनायोधाः तालिबान् उग्रानुपरि आक्रमणानि कृत्वा तान् बहिर्निष्कासितवन्तः। तालिबन् उग्राः नागरिकाणां निवासेषु रहसि निलीनास्सन्ति तान् बहिः निष्कासयेदेव। अतः न्याटो-हेलिकाप्टर् विमानानि कुन्दुज्-नगरस्य वसतिसमुच्चय प्रदेशानुपरि उड्डयन्ति वर्तन्ते । प्रमुखेषु मार्ग-चत्वरेषु विशेषान् सेनाबलसैनिकान् अधिकारिणः नियुक्तवन्तः। नगरस्य बहिर्वलये वसतिप्रदेशानुपरि गुळिकास्त्रप्रयोगाः प्रचलन्त एव वर्तन्ते ।